শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৭২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৭২

*অক্ৰূরাগমনৱৰ্ণনম্*

কংসোথ নারদগিরা ৱ্ৰজৱাসিনং ত্ৱামাকৰ্ণ্য দীৰ্ণহৃদযঃ স হি গান্দিনেযম্।
আহূয কাৰ্মুকমখচ্ছলতো ভৱন্তমানেতুমেনমহিনোদহিনাথশাযিন্॥ ১ ॥

অক্ৰূর এষ ভৱদঙ্ঘ্ৰিপরশ্চিরায
ত্ৱদ্দৰ্শনাক্ষমমনাঃ ক্ষিতিপালভীত্যা।
তস্যাজ্ঞযৈৱ পুনরীক্ষিতুমুদ্যতস্তৱা-
মানন্দভারমতিভূরিতরং বভার॥ ২ ॥

সোযং রথেন সুকৃতী ভৱতো নিৱাসং
গচ্ছন্ মনোরথগণাংস্তৱযি ধাৰ্যমাণান্।
আস্ৱাদযন্ মুহুরপাযভযেন দৈৱং
সম্প্ৰাৰ্থযন্ পথি ন কিঞ্চিদপি ৱ্যজানাত্॥ ৩ ॥

দ্ৰক্ষ্যামি ৱেদশতগীতগতিং পুমাংসং
স্প্ৰক্ষ্যামি কিংস্ৱিদপি নাম পরিষ্ৱজেযম্।
কিং ৱক্ষ্যতে স খলু মাং ক্ৱনু ৱীক্ষিতঃ স্যা-
দিত্থং নিনায স ভৱন্মযমেৱ মাৰ্গম্॥ ৪ ॥

ভূযঃ ক্ৰমাদভিৱিশন্ ভৱদঙ্ঘ্ৰিপূতং
ৱৃন্দাৱনং হরৱিরিঞ্চসুরাভিৱন্দ্যম্।
আনন্দমগ্ন ইৱ লগ্ন ইৱ প্ৰমোহে
কিং কিং দশান্তরমৱাপ ন পঙ্কজাক্ষ॥ ৫ ॥

পশ্যন্নৱন্দত ভৱদ্ৱিহৃতিস্থলানি
পাংসুষৱেষ্টত ভৱচ্চরণাঙ্কিতেষু।

কিং ব্রূমহে বহুজনা হি তদাপি জাতা
 এৰং তু ভক্তিতরলা ৰিরলাঃ পরাত্মন্॥ ৬ ॥

সাযং স গোপভৰনানি ভৰচ্চরিত্র-
 গীতামৃতপ্রসৃতকর্ণরসাযনানি।
পশ্যন্ প্রমোদসরিদেৰ কিলোহ্যমানো
 গচ্ছন্ ভৰদ্ভৰনসন্নিধিমন্বযাসীত্॥ ৭ ॥

তাৰদ্দদর্শ পশুদোহৰিলোকলোলং
 ভক্তোত্তমাগতিমিৰ প্রতিপালযন্তম্।
ভূমন্ ভৰন্তমযমগ্রজৰন্তমন্ত-
 র্ব্রহ্মানুভূতিরসসিন্ধুমিৰোদ্ৰমন্তম্॥ ৮ ॥

সাযন্তনাপ্লৰৰিশেষৰিৰিক্তগাত্রৌ
 দ্বৌ পীতনীলরুচিরাম্বরলোভনীযৌ।
নাতিপ্রপঞ্চধৃতভূষণচারুৰেষৌ
 মন্দস্মিতার্দ্রৰদনৌ স যুৰাং দদর্শ॥ ৯ ॥

দূরাদ্রথাতসমৰরুহ্য নমন্তমেন-
 মুত্থাপ্য ভক্তকুলমৌলিমথোপগূহন্।
হর্ষান্মিতাক্ষরগিরা কুশলানুযোগী
 পাণিং প্রগৃহ্য সবলোথ গৃহং নিনেথ॥ ১০ ॥

নন্দেন সাকমমিতাদরমর্চযিত্বা
 তং যাদৰং তদুদিতাং নিশময্য ৰার্তাম্।
গোপেষু ভূপতিনিদেশকথাং নিৰেদ্য
 নানাকথাভিরিহ তেন নিশামনৈষীঃ॥ ১১ ॥

চন্দ্রাগৃহে কিমুত চন্দ্রভগাগৃহে নু
 রাধাগৃহে নু ভৰনে কিমু মৈত্রৰিন্দে।
ধূর্তো ৰিলম্বত ইতি প্রমদাভিরুচ্চৈ-
 রাশঙ্কিতো নিশি মরুতপুরনাথ পাযাঃ॥ ১২ ॥

**********